# Shri Ganesha Stuti ManjarI

# શ્રીગણેશસ્તુતિમઞ્જરી

## Document Information

Text title : Ganesha Stuti Manjari

File name : gaNeshastutimanjarI.itx

Category : ganesha, chandrashekharabhAratI

Location : doc_ganesha

Author : chandrashekharabhAratI

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : November 15, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીગણેશસ્તુતિમઞ્જરી

સદ્ગુરુગજાસ્યવાણીચરણયુગામ્ભોરુહેષુ મદ્ધૃદયમ્ ।
સતતં દ્વિરેફલીલાં કરુણામકરન્દલિપ્સયા તનુતામ્ ॥ ૧॥

કલ્યાણં નઃ ક્રિયાસુઃ કટતટવિગલદ્દાનનીરપ્રવાહો-
   ન્માદ્યદ્ભૃઙ્ગારવારાવિતનિખિલજગન્મણ્ડલસ્યેશસૂનોઃ ।
પ્રત્યૂહધ્વાન્તરાશિપ્રમથનશુચિકાલીનમધ્યાહ્નભાનોઃ
   વામાશ્લિષ્ટપ્રિયસ્ય પ્રણતદુરિતહૃદ્દન્તિનઃ સત્કટાક્ષાઃ ॥ ૨॥

સિન્દૂરબન્ધુરમુખં સિન્ધુરમાદ્યં નમામિ શિરસાઽહમ્ ।
વૃન્દારકમુનિવૃન્દક સં સેવ્યં વિઘ્નશૈલદમ્ભોલિમ્ ॥ ૩॥

આધોરણા અંકુશમેત્ય હસ્તે ગજં વિશિક્ષન્ત ઇતિ પ્રથાઽસ્તિ ।
પઞ્ચાસ્યસૂનુર્ગજ એવ હસ્તે ધૃત્વાઽઙ્કુશં ભાતિ વિચિત્રમેતત્ ॥ ૪॥

લોકે હસ્તતલે સમેત્ય હિ સૃણિં શિક્ષન્ત આધોરણાઃ
   સ્તમ્બક્રીડમિતિ પ્રથાઽખિલજનૈઃ સંશ્રૂયતે દૃશ્યતે ।
ધૃત્વા સ્વીયશયેઽઙ્કુશં મદવિહીનોઽયં નિરાધોરણઃ
   ચિત્રં પશ્યત રાજતીહ વિબુધાઃ પઞ્ચાસ્યસૂનુર્ગજઃ ॥ ૫॥

ખગપપૂજિતસચ્ચરણામ્બુજં ખગપશાત્રવવેષ્ટિતતુન્દકમ્ ।
કવનસિદ્ધ્યભિલાષ્યહમાશ્રયે કવનદીક્ષિતમાદિગજાનનમ્ ॥ ૬॥

ગગનચારિભિરઞ્ચિતપાદુકં કરધૃતાઙ્કુશપાશસુમોદકમ્ ।
જિતપતઙ્ગરુચિં શિવયોર્મુદં દદતમાદિગજાનનમાશ્રયે ॥ ૭॥

નાગાનનસ્ય જઠરે નિબદ્ધોઽયં વિરાજતે ।
વિનિર્ગતો યથા નાગો નાભ્યધોભુવનાદ્બહિઃ ॥ ૮॥

પ્રલમ્બારિમુખસ્તુત્યં જગદાલમ્બકારણમ્ ।
લમ્બિમુક્તાલતારાજલ્લમ્બોદરમહં ભજે ॥ ૯॥

ગજેન્દ્રવદનં હરિપ્રમુખદેવસમ્પૂજિતં
    સહસ્રકરતેજસં સકલલોકકામપ્રદમ્ ।
દયારસમદોદકસ્રવદ્ભૌ કટૌ બિભ્રતં
    નમામિ શિરસા સદા સૃણિવિભૂષિતં વિઘ્નપમ્ ॥ ૧૦॥

ગણ્ડસ્રવત્સ્વચ્છમદપ્રવાહગઙ્ગાકટાક્ષાર્કસુતાયુતશ્ચ ।
જિહ્વાઞ્ચલે ગુપ્તવહત્સરસ્વતીયુતોઽયમાભાતિ ગજપ્રયાગઃ ॥ ૧૧॥

દન્તી નટઃ સ્વપુરતોઽઙ્ગણરિઙ્ખમાણ-
    પાઞ્ચાલિકેક્ષણવતામિતિ સૂચયન્ સન્ ।
મત્પાદતામરસબમ્ભરમાનસાનાં
    જિહ્વાઙ્ગણેઽજગૃહિણીં ખલુ નાટયામિ ॥ ૧૨॥

પિનાકિપાર્વતીમુખારવિન્દભાસ્કરાયિતં
    વરાભયાઙ્કુશાદિમાન્ પ્રફુલ્લકઞ્જસન્નિભૈઃ ।
કરૈર્દધાનમાનમત્સુતીક્ષ્ણબુદ્ધિદાયકં
    સમસ્તવિઘ્નનાશકં નમામ્યહં વિનાયકમ્ ॥ ૧૩॥

અન્તરાયગિરિકૃન્તનવજ્રં દન્તકાન્તિસુવિભાસિતલોકમ્ ।
ચિન્તનીયમનિશં મુનિવૃન્દૈઃ ચિન્તયામિ સતતં ગણનાથમ્ ॥ ૧૪॥

મુક્તિવધૂવરણોત્સુકલોકો રક્તિમશાશ્વત આશુ વિહાય ।
ભક્તિયુક્તોઽમરપૂજિતમૂર્તે શક્તિગણેશ મુદાઽર્ચતિ હિ ત્વામ્ ॥ ૧૫॥

યત્પાદપઙ્કજમતીવ સુપુણ્યપાકાઃ
    સમ્પૂજયન્તિ ભવસાગરતારણાર્થમ્ ।
તં પાર્વતીશિવમુખાબ્જસહસ્રભાનું
    વન્દે સમસ્તવિષયાઞ્ચિતમાવહન્તમ્ ॥ ૧૬॥

ગણ્ડપ્રદેશવિગલન્મદનીરપાનમત્તદ્વિરેફમધુરસ્વર દત્તકર્ણમ્ ।
વિઘ્નાદ્રિભેદશતકોટિમુમાદિગુર્વોઃ વક્ત્રાબ્જભાસ્કરગણેશમહં નમામિ ॥ ૧૭॥

ગણેશોઽયં સૂચયતિ મદ્દ્રષ્ટૄણાં દદે શ્રિયમ્ ।
અશ્વપૂર્વાં રથમધ્યાં હસ્તિનાદપ્રબોધિનીમ્ ॥ ૧૮॥

પુરેન્દુકોપયુક્તદન્તિસાન્ત્વનેતતારકાઃ
    ઉત સ્મિતાંશુસઞ્ચયો દિને દિને વિજૃમ્ભિતઃ ।
ઉતોત્તમાઙ્ગનિસ્સૃતા નુ કુમ્ભસમ્ભવા ઇતિ

ગણેશકણ્ઠતારકા ભવન્તિ સંશયાસ્પદમ્ ॥ ૧૯॥

મદઙ્ઘ્ર્યર્ચકાનાં ભવેજ્જાનુદઘ્નો ભવામ્ભોધિરિત્યેતમર્થં વિવક્ષુઃ ।
કરૌ જાનુયુગ્મે નિધાયાવિરાસ્તે પુરઃ શ્રીગણેશ કૃપાવારિરાશિઃ ॥ ૨૦॥

લોકે ધનાઢ્યો ધનિનઃ કરોતિ સ્વપાદમૂલેતજનાન્ દરિદ્રાન્ ।
ત્વં પાશયુક્તોઽપિ પદાબ્જનમ્રાન્ પાશૈર્વિમુક્તાન્ કિમુ યુક્તમેતત્ ॥ ૨૧॥

હે હેરમ્બ મદીયચિત્તહરિણં હ્યત્યન્તલોલં મુધા
ધાવન્તં વિષયાખ્યદુઃખફલદારણ્યેઽનુધાવન્નહમ્ ।
શ્રાન્તો નાસ્તિ બલં મમાસ્ય હનને ગ્રાહેઽપિ વા તદ્ભવાન્
કૃત્વાઽસ્મિન્ પરિપાતુ માં કરુણયા શાર્દૂલવિક્રીડિતમ્ ॥ ૨૨॥

ઇતિ શ્રીજગદ્ગુરુ શ્રીશૃઙ્ગેરીપીઠાધિપ શ્રીચન્દ્રશેખરભારતી
શ્રીપાદૈઃ વિરચિતા શ્રીગણેશસ્તુતિમઞ્જરી સમાપ્તા ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Shri Ganesha Stuti ManjarI*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*